# Shivalingarchanaphalam

# शिवलिङ्गार्चनफलम्

## Document Information

Text title : Shivalingarchanaphalam

File name : shivalingArchanaphalam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 1 | 32-43||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# शिवलिङ्गार्चनफलम्

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

ईश्वर उवाच ।

का विवक्षास्ति ते सुभ्रु निःशङ्कं मे वदाग्रतः ॥ ३२॥

त्वं मे शक्तिः परा देवी त्वयाहं शक्तिमान् शिवे ।
त्वत्तेजसा जगद्व्याप्तं सदेवासुरमानुषम् ॥ ३३॥

रहस्यं वा प्रकाशं वा वदामि प्रमुदे त्वयि ।
त्वं मे शरीराधिकृता वद मे तं हृदि स्थितम् ॥ ३४॥

कुमार उवाच ।
इति शम्भोर्वचः श्रुत्वा गिरिजा हर्षनिर्भरा ।
समुद्यदश्रुपुलका प्राह कामारिमीश्वरी ॥ ३५॥

गिरिजा उवाच ।
देव देव महादेव शरणागतवत्सल ।
स्वानन्दराशिवाराशे कृपाराशे महेश्वर ॥ ३६॥

शिवार्चनविधानं मे कालतिथ्यृक्षके तव ।
लिङ्गेऽभिषेकसम्भारः फलपञ्चामृतैः कृतः ॥ ३७॥

पुष्पधूपादि दाने च दीपनैवेद्यकल्पनैः ।
धातुपात्रे तारतम्यमर्घ्यताम्बूलकल्पनम् ॥ ३८॥

तत्फले तारतम्यं च वद मे करुणार्णव ।
सूत उवाच ।
इत्यपर्णावचः श्रुत्वा सम्पूर्णहृदयः शिवः ॥ ३९॥

प्राह प्रमोदभरितः दृष्ट्वा तामद्रिकन्यकाम् ।

महादेवो महानन्दः परानन्दमहोदधिः ॥ ४० ॥

ईश्वर उवाच ।
अये सुगिरिकन्यके तव सरोजराजाननं
विलोक्य मुदमादितः प्रभृति पारसारं गतः ।
अनन्तमहिमास्पदं शिवरहस्यरत्नाकरं
सुगोप्यमपि तद्वदे(?) शिवगणेषु तुष्टिप्रदम् ॥ ४१ ॥

प्रकाश्यमिदमेव ते मम हृदि प्रकृष्टं चिरं
प्रतुष्टिदमिदं शिवे विहितसर्वधर्मैरपि ।
न यागशतकोटिभिर्विविधदानकोट्यापि वा
तुरङ्गगजगोघ्नैर्द्विजवरेषु दत्तैश्च किम् ॥ ४२ ॥

भक्तो मे यदि लिङ्ग तुङ्गविहितानङ्गाङ्गसङ्गोज्झितो
गङ्गातुङ्गतरङ्गचञ्चलमना गङ्गतरङ्गाप्लुतः ।
भूयाद्भावुकभक्तिभावहृदयो भावो भवेऽप्यध्रुवे
लिङ्गार्चासु निषक्तमुग्धहृदयो व्यक्तं स मुक्तिं गतः ॥ ४३ ॥

॥ इति शिवरहस्यान्तर्गते शिवलिङ्गार्चनफलं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः १ । ३२-४३ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 1 . 32-43..

Proofread by Ruma Dewan

*Shivalingarchanaphalam*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*